# Shri Radhakritam Shrikrishnanarayana Stotram

# શ્રીરાધાકૃતં શ્રીકૃષ્ણનારાયણસ્તોત્રમ્

## Document Information

Text title : Shri Radhakritam Shrikrishnanarayana Stotram

File name : rAdhAkRRitaMshrIkRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 1/1-28||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# શ્રીરાધાકૃતં શ્રીકૃષ્ણનારાયણસ્તોત્રમ્

શ્રીરાધિકા ઉવાચ ।
ૐ નમઃ શ્રીપરબ્રહ્મ પરેશ પરમાત્મને ।
અનાદિશ્રીકૃષ્ણનારાયણાયાઽક્ષરશાસિને ॥ ૧॥

ત્રેતાસન્તાનસત્પિત્રે રાધાકાન્તાય યોગિને ।
લક્ષ્મીનારાયણાય શ્રીમાણિક્યાવાહિને નમઃ ॥ ૨॥

સ્વપ્રભાસ્વામિને મઞ્જુલાલકાયાત્મવાસિને ।
ઈશાપારવતીશાય નમઃ સગુણમૂર્તયે ॥ ૩॥

હંસજ્યોતિસ્વરૂપાય શક્ત્યૈશ્વર્યાદિસમ્ભૃતે ।
કુઙ્કુમવાપિકાક્ષેત્રપ્રકટાય નમો નમઃ ॥ ૪॥

સર્વધામાધિપેશાય નમોઽન્તર્યામિણે મુહુઃ ।
સ્વર્ગમોક્ષાદિદાત્રે તે નમઃ શ્રીહરયે નમઃ ॥ ૫॥

નિરવધિસમૈશ્વર્યગુણવૈભવશાલિને ।
અસઙ્ખ્યમુક્તસેવ્યાયાઽક્ષરાધિપતયે નમઃ ॥ ૬॥

એકોઽપિ બહુધા દૃષ્ટઃ કૃષ્ણનારાયણાદિમાન્ ।
ઈશેશાન્યાદિરૂપશ્ચ તસ્મૈ શ્રીસ્વામિને નમઃ ॥ ૭॥

પરવિદ્યાધિદેવાય બ્રહ્મપ્રિયાઽધિશાયિને ।
ગીતોપનિષત્પતયે જયન્તીપતયે નમઃ ॥ ૮॥

એકાદશીપ્રિયાયારાધનાકાન્તાય શાર્ઙ્ગિણે ।
મહાલક્ષ્મીશ્વરાયાપિ ભક્તીશાય નમો નમઃ ॥ ૯॥

મુક્તેશાય રમેશાય ગઙ્ગેશાય નમો નમઃ ।
પતિવ્રતાધિપતયે રુક્મિણીશાય તે નમઃ ॥ ૧.૧૦॥

કામદુઘાધિનાથસ્ત્વં પૃથ્વીશસ્ત્વં રતીશ્વરઃ ।

વિભૂતીશોઽસિ સંક્ષેશઃ શં કરોતુ પ્રસેવિનામ્ ॥ ૧૧॥

કમલાકાન્ત દેવીશ મોહિનીધવ સિદ્ધિપ ।
ઉર્વશીશ્વર બુદ્ધીશ પાર્વતીશ વિધેહિ શમ્ ॥ ૧૨॥

દીક્ષાધીશ ચ લીલેશ નારાયણીપતે પ્રભો ।
વિરજાકાન્ત ભગવન્ વૃન્દાનાથ વિધેહિ શમ્ ॥ ૧૩॥

સરસ્વતીપ્રિય સ્વર્ણરેખાપ્રિય સિતાપતે ।
દેવિકેશ્વર તુલસીવિહાર પ્રવિધેહિ શમ્ ॥ ૧૪॥

વિભાવર્યધિનાથસ્ત્વં મૂર્તીશ્વરો જયેશ્વરઃ ।
ગોમતીશો મૌક્તિકેશો ભવાન્ ભવતુ રુક્મદઃ ॥ ૧૫॥

પ્રેમસખીપતે ગોદાવરીશ કપિલેશ્વર ।
ધાત્રીપતે સ્વર્ણગૌરીપતે સર્વપ્રદો ભવ ॥ ૧૬॥

લલિતેશ્વર રમ્ભેશ કુમુદ્વતીપતે પ્રભો ।
શીતલાધિપતે ઉમાકાન્ત વિધેહિ શં સદા ॥ ૧૭॥

હેમન્તેશ્વર નન્દેશ શાન્તિસ્વામિન્ કલાપતે ।
નન્દિનીનાથ દુર્ગેશ વિજયેશ વિધેહિ શમ્ ॥ ૧૮॥

સન્ધ્યાધિનાથ કસ્તૂરીપ્રિય ધન્યાઽધિનાયક ।
સાવિત્રીવર દોલાધિરોહ પુષ્પાસુગન્ધભાક્ ॥ ૧૯॥

સવિતાધિપતે ચિત્રલેખેશ્વર નમોઽસ્તુ તે ।
પૂર્ણિમાધિપતે બ્રહ્મન્ શારદાકાન્ત માધવ ॥ ૧.૨૦॥

મઞ્જરીશ્વર યોગિનીચક્રકાન્ત વિધેહિ શમ્ ।
પ્રેયસીશ શ્રેયસીશ વિકુણ્ઠેશાઽરુણાપતે ॥ ૨૧॥

જોષ્ટ્રીશ્વર શબરીશ પમ્પેશ ગાલવીપતે ।
યાજ્ઞસેનીપતે વસુમતીશ વિજયોઽસ્તુ તે ॥ ૨૨॥

સુદુઘાનાથ ચ પદ્માવતીપાલક કેશવ ।
ભાર્ગવીપાણિસઙ્ગ્રાહ પદ્મિનીવર ચાઽચ્યુત ॥ ૨૩॥

શ્રીમતીશ જરત્કાર્વીપતે લીલાવતીશ્વર ।
કલાવતીપ્રાણનાથ કદલીશ જયોઽસ્તુ તે ॥ ૨૪॥

કાન્તિમતીપતે કાલિન્દીશ રેવાપતે પ્રભો ।
વર્ધિનીશ સુમિત્રેશ પુણ્યનૈધેયિકાપતે ॥ ૨૫॥

બન્દુલેશ સુશીલેશ માનસેશ જનાર્દન ।
શર્મવતીશ્વર કૃષ્ણ માધવીશ નમોઽસ્તુ તે ॥ ૨૬॥

કર્ણોત્પલેશ દીર્ઘિકાપતેઽક્ષમાલિકાપતે ।
ઉદુમ્બરીપતે ઋતમ્ભરાધીશ જયોઽસ્તુ તે ॥ ૨૭॥

બદરીશ ચ કુબ્જેશ હૈમીશ મઙ્ગલાપતે ।
મહાવેદીપતે કૃષ્ણાપતે ત્વાં ચિન્તયે હૃદિ ॥ ૨૮॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય પ્રથમાધ્યાયાન્તર્ગતં
શ્રીરાધાકૃતં શ્રીકૃષ્ણનારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૧/૧-૨૮॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 1/1-28..

Proofread by PSA Easwaran

*Shri Radhakritam Shrikrishnanarayana Stotram*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*